Digitized by Madhuban Trust, Delhi

सामवेदराणायनीयम्

वर्गपरिभाषाधारितवेयगानम्

प्रथमो भागः

प्रकाशकः

राणायनीयसंशोधनाप्रतिष्ठानम्, तिरुपति

सह प्रकाशकः

श्री समर्थ सेवा प्रतिष्ठानम् - नांदेड

सामवेदराणायनीयम् वर्गपरिभाषाधारितवेयगानम् प्रथमो भागः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सामवेदराणायनीयं वर्गपरिभाषाधारितं वेयगानम्

प्रथमो भागः

ISBN :- 978-93-5087-527-8 (Vol -1)
ISBN :- 978-93-5087-310-6 (set)

प्रकाशकः
राणायनीयसंशोधनाप्रतिष्ठानम्-तिरुपति
सह प्रकाशकः
श्री समर्थ सेवा प्रतिष्ठानम् - नांदेड, महाराष्ट्रप्रांत
2012

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ग्रन्थस्य नाम : सामवेदराणायनीयम् वर्गपरिभाषाधारितवेयगानम्
प्रथमो भागः

[c] प्रकाशकः राणायनीयसंशोधनप्रतिष्ठानम्–तिरुपति
सह प्रकाशकः श्री समर्थ सेवा प्रतिष्ठनम् - नांदेड, महाराष्ट्रप्रांत

सम्पादकाः सम्पादकीयासमितिः(परिशोधनासमितिः)

वेदमूर्तिः । श्री शिवराम भट्टः, अलेख, होन्नावर ।

वेदमूर्तिः । श्री सुब्राय भट्टः, हारूरि, गोकर्ण ।

वेदमूर्तिः । श्री सुब्रह्मण्य भट्टः, मैसूरु ।

वेदमूर्तिः । श्री गिरिजा प्रसाद षडङ्गिः, तिरुपति ।

वेदमूर्तिः । श्री प्रकाश सुब्राय भट्टः, कोलगि, सिद्दापुर ।

प्रथममुद्रणम् २०१२

पृष्ठाः ४०+२१०=२५०

प्रतयः ५००

अक्षरसंयोजनम्+रक्षाकवचविन्यासः+भूमिका

वेदमूर्तिः, प्रकाश सुब्राय भट्ट, कोलगि

मुद्रकाः सारंग प्रिंटिंग प्रेस, नांदेड

मौल्यम् २०० रूप्यकाणि

प्रकाशकाः राणायनीयसंशोधनाप्रतिष्ठानम्–तिरुपति
सह प्रकाशकः श्री समर्थ सेवा प्रतिष्ठनम् - नांदेड, महाराष्ट्रप्रांत

ग्रन्थलब्धिस्थानम् :– गिरोजा प्रसाद षडंगी
H.N. 18.01.26/5B, Dwarka Nagar,
K.T. Road, Tirupati, A.P. – 517507
E-mail : gpshadangi@rediffmail.com
Mo. No. : 09951051209

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

Samaveda

RANAYANIYAM VARGAPARIBHASHADHARITAM VEYAGANAM Part - 1

Type setting

Vidvan: Prakash Subray Bhat
At-Kolgi, Po-Shiralgi,
Ta-Siddapur (U.K) 581355.
Karnataka
Vidvan : Girija Prasad Shadangi
H.N. 18.01.26/5B, Dwarka Nagar,
K.T. Road, Tirupati, A.P. – 517507

Page No- 40+210=250

First Edition 2012

Copies-500

Published by : Ranayaniyasamshodhanapratisthanam.
Tirupati .
Co-Published by : Shree Samarth Seva Pratisthanam.
Nanded.

Printed by : Sarang Printing Press, Nanded.

Editor Samiti

Vedamurti : Shree Shivarama Bhat, Alekha.
Vedamurti : Shree Subraya Bhat, Haruri.
Vedamurti : Shree Subrahmanya Bhat, Mysore.
Vedamurti : Shree Girija Prasada Sadangi, Tirupati.
Vedamurti : Shree Prakasha Subrya Bhat, Kolgi.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥श्रीः॥

॥ सपर्या पर्यायस्तव भवतु यन्मे विलसितम् ॥

॥ ॐनमःसामवेदाय॥

पुरोवाक्

सप्ताकारविभक्तिरम्यतनुमान् सप्तस्वरद्वीपवान्
नानारूपमखाख्य रत्ननिलयो देवर्ष्यनेकाश्रयः ।
कल्पेन्दूदय वर्धमानविभवश्छन्दोनदीपूरितः
स्तोभोत्तुङ्गतरङ्गवानवतु वस्सामागमाम्भोनिधिः ॥

अथेदानीं वर्गपरिभाषाभूषितं राणायनीयं वेयगानमिदंप्रथमतया सम्मुद्य प्रकाश्यते । इतः पूर्व राणायनीयशाखानुसारिणः कौथुमशाखापुस्तकमाधारीकृत्याध्ययनं कुर्वन्ति स्म । ततोऽपि पूर्व तिकलरिलिप्यामाबद्धं हस्तलिखितपुस्तकानुसारेणाध्ययनं कुर्वन्ति स्म । तत्त्विदानीं दुःसाध्यमिति भाति । हस्तलिखितपुस्तकेषु स्वाभाविकतया लेखनदोषादीनां बाहुल्यमासीत् । लिखितमपि समीकरणं न कृतमस्ति । प्रतिदिनं ब्रह्मयज्ञकाले अस्मच्छाखीयं पुस्तकमावश्यकमिति सर्वदा मनः प्रेरयति स्म अस्मिन् कार्ये। आदौ केवलमात्मार्थमेव गणकयन्त्रे लिखितुमारब्धवान् । परमस्मिन् कार्ये इतोऽपि संशोधनमावश्यकमिति विचिन्त्य मूलग्रन्थसम्पादनार्थं प्रयत्नः कृतः। तावतिकाले ताडपत्राणां छायाप्रतिकृतिर्लब्धा । तत ऋषिछन्दोदेवतानां, साम्नां नामविशेषं, लिखितपुस्तके स्थितं च (दोषं) न्यूनातिरिक्तानप्यस्मिन्नेव पुस्तके स्थापनीयमिति धिया तत्सम्बन्धिग्रन्थसम्पादनमध्ययनञ्चापतितम् । तदर्थं सहकारिणामेका समितिरप्यारचिताभवत् । तस्यां समितौ वेदमूर्तिः श्री शिवराम शम्भु भट्ट अलेख, मम गुरवः वेदमूर्ति श्री सुब्राय सत्यनारायण भट्ट हारुरि, गोकर्ण, वेदमूर्ति श्री सुब्रह्मण्य गणपति भट्ट मैसूरु, वेदमूर्ति श्री गिरिजा प्रसाद षडङ्गि, अहमेवं पञ्चसदस्याः सन्ति । श्रीमन्तः राष्ट्रपतिपुरस्कृतः वेदमीर्ति श्री शिवराम शम्भु भट्ट अलेख, एते तत्सम्बन्धिपुस्तकानां (हस्तलिखित) प्रीत्यादरेण च दत्तवन्तः । मम गुरवः वेदमूर्ति श्री सुब्राय सत्यनारायण भट्ट हारुरि, गोकर्ण, महाभागाः पुस्तके

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अस्मच्छाखानुसारेणैव भवति । (छलाक्षर) परिभाषापाठः अथवा वर्गाक्षरपाट एव राणायनीयशाखासम्प्रदायः। एतावत्पर्यन्तं अस्याः संहितायाः लिप्यन्तरकरणं तथा मुद्रणविषेये न केनापि विचारः कृतः। शाखायाः अध्येतृणां छात्राणां सुलभतया अध्ययनसाधनाय अस्मिन् कार्ये प्रवृत्तिः जाता इति मन्ये । तदर्थं काचन समितिः विरचिता । तया समित्या परिशोधनं कृत्वा दोषराहित्येन मुद्रणं भवितुं प्रयत्नः कृतः अस्ति ।

अस्य प्रकाशनमपि राणायनीयसंशोधनाप्रतिष्ठानम् तिरुपति द्वारा भवति इति तु महते प्रमोदाय। यतोहि अस्मत् शाखाविषये अध्ययनं संशोधनं च भवतीति विषय एव सन्तोषं जनयति । अतः अनेन राणायनीयसंशोधनाप्रतिष्ठानेन राणायनि तथा राणायनीय विषये महत्संशोधनं भवतु । तथा अस्य पुस्तकस्य लिप्यन्तरकरणे मुद्रणे शुद्धतायां च बद्धादरेभ्यः भगवति वेदमाता शाखाचार्यः महर्षिः राणायनिश्च इतोऽपि कार्यकरणसामर्थ्यम् अवकाशञ्च देयात् , गुरु-देवतानुग्रहः सर्वेषामुपरि वर्षतु इति आराध्यमानां श्रीललिताम्बिकां प्रार्थये ।

इति

भवदीयः

शिवराम शम्भु भट्टः, अलेख,

श्रौतस्मार्तविद्वान्, राष्ट्रपतिप्रशस्तिपुरस्कृतः,

वेदरत्नः, उपाध्यायः, सामवेद पाठशाला(राणायनीयशाखा)

पो-होसाकुळि. ता-होन्नावर, उत्तरकन्नडमण्डलम्, कर्नाटकराज्यम्

****

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ शुभाशंसनम् ॥

प्रीणातु ललिताम्बिका

सप्तस्वरैः समस्तँ यो जगदेतच्चराचरम् ।
सञ्जीवयति विश्वात्मा स मे विष्णुः प्रसीदतु ॥

मनुष्याणां ऐहिकामुष्मिकहितं बोधयन्तीषु मातृसमानादिषु श्रुतिषु सामवेदस्य विशिष्टस्थानं प्रसिद्धमेव । श्रीमद्भगवद्गीतायामपि गीताचार्येण भगवता "वेदानां सामवेदोऽस्मि" इत्युक्तवचनन्तु स्पष्टमेव । साम्नः भगवद्रूपत्वं निरुपितं तदुपासना च छान्दोग्योपनिषदि विस्तरेण निरूपयामास । **"यः साम्नः स्वरः तं देवा उपजीवन्ति"** इति सामविधानब्राह्मणे सामस्वरस्य विशेषत्वं प्रदर्शितमस्ति ।

"सहस्रवर्त्मा सामवेदः" इति महर्षिणा पतञ्जलिना यदुक्तं तत् गानपद्धतिभेदं प्रदर्शयति न तु शाखाभेदम् । **"त्रयोदशैते सामगाचार्याः"** इति सामोपाकर्मतर्पणप्रयोगे त्रयोदशसामगाचार्याणां नामनिर्देशनमपि कृतं विद्यते; परन्त्विदानीं दशशाखानां संहिता नोपलभ्यते । केवलं राणायनीय, कौथुमी, जैमिनीयानाम् इति शाखात्रयाणां संहिता एव लभ्यते । तत्र कौथुमी तथा जैमिनीयानां संहिता पुस्तकरूपेण मुद्रितमस्ति । परं राणायनीयशाखायाः संहिता एतावत्पर्यन्तं पुस्तकरूपेणैव कदापि न प्रत्यक्षीबभूव । तथाप्येतावत्पर्यन्तमपि अध्ययनपरम्परा विशिष्टरूपेणैव विद्यते एव । वर्गाक्षरपाठः अथवा (छलाक्षरपाठः) परिभाषापाठः इत्येवं व्यवहारः अस्ति । तिकलरि इत्यस्यां लिप्यामाबद्धमिदानीमपि हस्ताक्षरविशिष्टताडपत्रेषु समुपलभ्यते राणायनीया छलाक्षरसंहिता अथवा वर्गाक्षरसंहिता। स्वरविज्ञानं वर्गाक्षरलक्षणेनैव ज्ञायते । तस्मात् आदौ वर्गपाठः ततः मन्त्रपाठः इति क्रमः आसीत् । तदपि दुःशकमेवासीत् । यतोहि ओग्नाइ इत्यस्य ओ^त^ग्नाइ इति लिखितं भवति; तस्योच्चारणं ओ^4 ग्नाइ(यि) इति (चतुर्थ) त स्वरे करणीयं भवति । तस्मात् गच्छति काले अध्ययनसौकर्यार्थं कौथुमशाखापुस्तकं दृष्ट्वा अध्ययनक्रमः प्रायः त्रिंशत् वर्षादारब्धं स्यात् इति मन्ये तदपि पाठशालासु । मन्त्रोच्चारणक्रमस्तु

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

च सङ्गृह्यमाणविषये बहुधा मार्गदर्शनमकारि । भूमिकां परिशील्य योग्यमार्गदर्शनेन सहकृतवन्तः । मैसूरु महाराज संस्कृतपाठशालायां सामवेद अध्यापकरूपेण कार्यं कुर्वन् मम सहाध्यायी वेदमूर्ति श्री सुब्रह्मण्य गणपति भट्ट महोदयः लिपिदोषान् परिमार्ज्य सकाले परिष्कृतभागं प्रेषितवान् । वेदमूर्ति श्री गिरिजा प्रसाद षडङ्गिः लेखने स्थितदोषपरिमार्जने तथा पुस्तकप्रकाशने व्यवस्थां सर्वां कृतवान् ममान्तेवासी अधुना तिरुपतौ वेङ्कटेश्वरविश्वविद्यालये सामवेदाध्यापन-कार्यं कुर्वन्नस्ति । एतेषां चतुर्णां मार्गदर्शने यथामति तत्र तत्र परिष्कारं कृत्वा राणायनीयं वर्गपरिभाषाधारितवेयगानमिदं पुस्तकरूपेण प्रकाशनार्थं सज्जीकृतवान् सामगानां पुरतः स्थाप्यते च ।

आदृतग्रन्थाः

०१.ताडपत्रस्थ तिकलरिलिप्यां स्थितं प्राचीनं पुस्तकम् । (छायाप्रतिकृतिः, यत्रत्याः पाठाः "क" चिह्नेन निर्दिष्टाः)

०२.तिकलरिलिप्यां लिखितसङ्ख्यास्वरैर्विभूषितं पुस्तकम् । (श्री अलेख शिवराम भट्ट महोदयैः दत्तम्, यत्रत्याः पाठाः "ख" चिह्नेन निर्दिष्टाः)।

०३.देवनागरलिप्यां लिखितं पुस्तकम् । (श्री सुब्राय सत्यनारायण भट्ट हारुरि गोकर्ण. महोदयैर्दत्तम्. यत्रत्याः पाठाः "ग" चिह्नेन निर्दिष्टाः)

०४.तिकलरिलिप्यां लिखितवर्गपरिभाषापुस्तकम् । (श्री अलेख शिवराम भट्ट महोदयैः दत्तम्)।

०५.आर्षेयब्राह्मणम् । (बि.आर्.शर्मभिः संशोधितं के.सं. विद्यापीठ तिरुपति द्वारा प्रकाशितम् ,साम्नां नामनिर्देशनमस्याधारेणैव कृतम्)

०६.सामवेदार्षेयदीपः । (बि.आर्.शर्मभिः संशोधितं के.सं. विद्यापीठ तिरुपति द्वारा प्रकाशितम् १९६७. ऋषिछन्दोदेवतानां निश्चयार्थम्)

०७.सामवेदसंहिता । (कौथुमीशाखा. काञ्चीद्वारा प्रकाशितम् १९७६)

०८.सामवेद पूर्वार्चिकः पदपाठश्च । (म.रामनाथदीक्षितवर्येण सम्पादितम् १९७८)

०९.सामविधानब्राह्मणम् । (बि.आर्.शर्मभिः संशोधितं, के.सं. विद्यापीठ तिरुपति द्वारा प्रकाशितम् १९८०)

१०.छान्दोग्योपनिषत् । (गीताप्रेस् गोरखपुर सङ्ख्या ०५८२)

११.सामतन्त्रम् । (ए.एम्.रामनाथदीक्षितवर्येण संशोधितम् बनारस् हि.यू.१९६१. भूमिकायां चतुस्त्रिंशत् भावविषये)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१२.मात्रालक्षणम् । (बि.आर्.शर्मभिः संशोधितं के.सं. विद्यापीठ तिरुपति द्वारा प्रकाशितम् १९७०, सञ्चारस्वरविषये)
१३.प्रतिहारसूत्रम् । (बि.आर्.शर्मभिः संशोधितं के.सं. विद्यापीठ तिरुपति द्वारा प्रकाशितम् १९७३)
१४.नारदीया शिक्षा । (राजकीय शाखा मुद्रणालयः मैसूरु १९४९)
१५.गौतमीयशिक्षा ।
१६.सामवेदसंहिता । (सामसंस्कारभाष्योपेतम् १९६०)
१७.ऊहगानम्,ऊह्यगानम् । (ए.एम्.रामनाथदीक्षितवर्येण संशोधितम्. बनारस् हि.यू.प्रकाशितम् १९६७ वत्सरे)
१८.सामसारसर्वस्वम् । (म.रामनाथदीक्षितवर्येण सम्पादितम् १९७२)

अत्र क ख ग पुस्तकेषु लिपिदोषाः समानतया आसन् । उदा- आ ञुअ मान्थाता । क,ख पुस्तके छु इति, ग पुस्तके ङु इत्यस्ति । परन्तु छु स्वरस्य स्वरसञ्चारः २१२१२, ङु स्वरस्य स्वरसञ्चारः १२३२१२३४५ भवति । अत्र तु स्वरसञ्चारः २१२३२३४५ आवश्यकः । तथा अभिगीतस्य द्वितीयादि प्रथमान्तत्वात् ङु स्वरः न इति निश्चितम् । अत्र द्वितीयात् मन्द्रान्तं यावत् स्वरसञ्चारो विद्यते । अतः छु इत्यपि भवितुं न शक्यते इति निर्णीतवान् । ततः अग्रे एतादृशसन्दर्भे एषु पुस्तकेषु ञु इति दत्तं दृष्ट्वा अत्रापि ञु इत्येव साधु इति तं स्वरं स्थापितवान् । एतादृशसन्दर्भे तत्तत्पृष्ठस्याधोभागे विवरणं दत्तमस्ति ।

आदौ भूमिकायां शाखायाः, सामस्वराणां, ग्रन्थस्यास्य च विवरणं तथा परिभाषापाठश्च विद्यते । अन्ते ऋषीनामनुक्रमणिका, देवतानामनुक्रमणिका च दत्ता विद्यते । वर्गाक्षरस्यापि अनुक्रमणिका दातव्या इत्यासीन्मनीषा । परं ग्रन्थस्य विस्तारभिया तन्न कृतम् । अग्रिमआवृत्तौ संयोजयामि ।

धन्यवादाः

मूलताडपत्राणि छायाप्रतिस्वीकरणाय तत्पुस्तकप्रदात्रे, वर्ग-परिभाषापुस्तकस्य च दात्रे, वेदमूर्ति. श्री शिवराम शम्भु भट्ट, अलेख, होसाकुलि, एभ्यः सनमोवाकं सविनयं कृतज्ञतां समर्पयामि । तथा

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अस्मिन् कार्ये आदितः अन्तपर्यन्तं शिष्यवात्सल्येन मार्गदर्शनं कृतवद्भ्यः, आवश्यकानि पुस्तकानि सकाले प्रदातृभ्योऽस्मद्गुरुभ्यो वेदमूर्ति श्री सुब्राय सत्यनारायण भट्ट, हारुरि, गोकर्ण, एभ्यः तेषां पादारविन्दयोः नतमस्तको भूत्वा सविनयं कृतज्ञतां समर्पयामि ।

तथा सकाले लिपिदोषान् परिशोध्य, प्रत्यर्प्य आवश्यकमार्गदर्शनं कृतवद्भ्यः मैसूरु वेदमूर्ति श्री सुब्रह्मण्य गणपति भट्ट महोदयेभ्यः सनमोवाकं सविनयं कार्तज्ञं समर्पयामि । तथा स्वशिष्यैः परिवृताय शुद्धप्रतिनिर्माणाय बद्धादराय, तदर्थं कृत भूरिपरिश्रमिणे, अस्य पुस्तकस्य प्रकाशनदायित्वं स्वीकृतवते वेदमूर्ति श्री गिरिजा प्रसाद षडङ्गि महोदयाय च कृतज्ञताभावं प्रदर्श्ययामि ।

निर्दिष्टसमये मुद्रणकार्यं कृतवते सारंग प्रिंटिंग प्रेस नांदेड धन्यवादं समर्पयामि । अस्य पुस्तकस्य प्रकाशनार्थं धनसहायं कृतवते श्री समर्थ सेवा प्रतिष्ठान नांदेड तेभ्यः हार्दिकं धन्यवादान् समर्पयामि ।

सामवेदराणायनीयशाखीयाः आत्मीयं मन्यमानाः ग्रन्थममुं सादरं स्वीकुर्वन्तु, अध्ययनाध्यापनैः परम्परां रक्षन्तु इति तान् प्रार्थये । रक्षाकवचं, अक्षरसंयोजनं, पुस्तकरीत्या आयोजनं च यथामति अधीत्य जागरूकेण परिष्कृतेऽप्यस्मिन् ग्रन्थे ये दोषाः सन्ति तान् क्षाम्यन्तु तथा मह्यं सूचयन्तु विद्वांसः, अनुगृह्णन्तु मामाशीर्भिरित्यभ्यर्थये । कार्येऽस्मिन्नियोजितवते श्री वेदमात्रे ऋषिगणाय च मनसा प्रणम्य, एतत् सामवेदराणायनीयं परिभाषाधारितं वेयगानात्मकं पुष्पं तयोः चरणारविन्दयोः भक्त्या समर्पयामि ।

नन्दन सं, आश्वीन शुक्ल दशमी — सज्जनविधेयः

२४/१०/२०१२ — विद्वान्. प्रकाश सुब्राय भट्टः,

****

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

* भूमिका *

ॐनमः सामवेदाय

समुद्रवारिजातसप्तितुल्यवक्त्रपुष्करान् सरलशातकुम्भसत्पदस्थितान् मनोहरान् ।
धृताक्षमाल्यकम्बुदक्षवामहस्तपङ्कजान्सुकृष्णपङ्करुट्प्रभान्नमामि सामवेदकान् ॥

सामवेदः

सामशाखाचिन्तनम्

सामवेदस्य खिल सहस्रभेदाः भवन्ति इति चरणव्यूहवाक्येन, "एषा सहस्रवर्मात्मा" इति गौतमीशिक्षावचनात्, 'सहस्रवर्मा सामवेदः' इति पतञ्जलिवचनाच्च सामवेदे सहस्रभेदाः आसन् इति ज्ञायते । ते च भेदाः कथं जाताः ? केन वा कृताः ? कदा वा अभवन् ? इत्यादि प्रश्नाः मनसि उद्भवन्ति । यतोहि व्यासेन जैमिनये केवलं सामवेदः उपदिष्टः न तु सभेदः सामवेदः इति कुत्रापि दृश्यते । तथा च श्रीमद्भागवते द्वादशस्कन्दे षष्ठेऽध्याये वेदस्वरूपकथनावसरे "सुकर्मापि तच्छिष्यः सामवेद-तरोर्महान् । सहस्रं संहिताभेदं चक्रे साम्नां ततो द्विजः"॥ इति वचनात् व्यासेन सहस्रभेदः न कृतः कालान्तरे जातः भेद इत्यवगम्यते । विष्णुपुराणे सामपरम्परायाः विषये एका आख्यायिका दृश्यते । तत्र व्यासेनोपदिष्टं सामवेदं जैमिनिः पुत्राय सुमन्तवे पौत्राय सुकर्मणे चोपादिशत् । सुकर्मणा सहस्रभेदाः अभवन् । सुकर्मा पौष्यञ्जये हिरण्यनाभिकौशल्याय चोपादिशत् । लोगाक्षिः, कुथुमिः,कुसीदिः, लाङ्गलिश्चेति चत्वारः पौष्यञ्जिशिष्याः यान् **उदीच्यसामगाः** इति कथयन्ति स्म । हिरण्यनाभिकौशल्यः पञ्चशतशिष्येभ्यः उपादिशत् । ते च **प्राच्यसामगाः** इति प्रसिद्धाः । हिरण्यनाभस्य पञ्चशतशिष्येष्वन्यतमः कृतिः स्वशिष्येभ्यः सामवेदं चतुर्विंशतिसंहिताभेदं कृत्वोपादिशत् । एवं तस्य शिष्यपरम्परया नानाभेदेन सामवेदः सहस्रवर्मा सञ्जात इत्यनेन सामवेदे कालान्तरे सहस्रभेदाः समभवन्निति ज्ञायते । हिरण्यनाभस्य शिष्येण कृतिना चतुर्विंशतिसंहिताभेदः कथं जातः? तथा तस्य शिष्यपरम्परया नानाभेदाः कथमभूवन् ? इति जिज्ञासायां सम्यगवलोकनेन ज्ञायते यत् केचनशिष्याः देवतासम्बन्धिमन्त्रानेवैकत्र सम्पादयामासुः । इदानीमुपलभ्यमानराणायनीय

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शाखायाः कौथुमशाखायाश्च संहितायाम् आग्नेयम्, ऐन्द्रं, पावमानम्, अर्क, द्वन्द्व, व्रत, शुक्रियेति विभागे देवताविशिष्टसम्पादनं दृश्यते । अत एवं कृतविभागेनैका संहिता जाता । तथान्येन शिष्येण विनियोगक्रमेणैव मन्त्रसम्पादनं कृतं स्यात् । यतोहि छान्दोग्यमन्त्रब्राह्मणे विनियोगक्रमेणैव मन्त्रसम्पादनं कृतमिति भाति । तथैव विषयानुसारेण मन्त्रसम्पादनमपि कर्तुं शक्यत इति मन्त्रब्राह्मणस्य द्वितीयप्रपाठकस्य सप्तमखण्डावलोकनेन ज्ञायते । एवमेकेनैव महर्षिणा दृष्टानां मन्त्राणां सम्पादनेन, छन्दःक्रममनुसृत्य मन्त्र-सम्पादनेन, योनिगानमनुसृत्य मन्त्राणां सम्पादनेन च संहिता निर्मिता स्यात् । एवं केवलमन्त्रसम्पादनेन संहिताभेदो जात इति वक्तुं शक्यते ।

ननु सहस्रवर्त्मा शब्देन सहस्रशाखाः इत्यर्थः न कदापि भवितुमर्हति । सहस्रभेदः मार्ग इत्येव ज्ञायते खलु? सत्यम्, **'अयनं वर्त्ममार्गाध्वपन्थानः पदवी सृतिः। सरणिः पद्धतिः पद्या वर्तन्येकपदीति च'**[क] ॥ इत्यमरकोशे मार्गपर्याये वर्त्म शब्दस्य दर्शनात् । **गीतिषु सामाख्या** इति जैमिनिसूत्रनुसारेण गान (राग,स्वर) प्रधानः सामवेद इति ज्ञायते । **का साम्नो गतिरिति स्वर इति होवाच**[का] इति छान्दोग्योपनिषन्मन्त्रेण तथा **तस्य ह वा एतस्य साम्नः यः स्वं वेद भवति तस्य वै स्वर एव स्वम्** इति बृहदारण्यकवचनेन च सामवेदस्य स्वरप्राधान्यं सुप्रसिद्धमेवेत्यवगम्यते । एवं साममन्त्राणां स्वरव्यत्ययेन भेदः भवितुं शक्यते । एवं च मन्त्रसम्पादनव्यत्ययेन शाखाभेदः, स्वरव्यत्ययेन सहस्रभेदः सामवेदे जात इति चिन्तनक्रमेणानेन निर्णीयते । विष्णुपुराणान्तर्गतकथनेन कृतिः चतुर्विंशतिभेदेन संहितामुपादिशदित्यनेन चतुर्विंशतिशाखामकरोत् इति जानीमः । न कुत्राप्येकत्र चतुर्विंशतिशाखानां नामोल्लेखनं समुपलभ्यते । परं सामगानामुत्सर्जनकर्मणि पूजातर्पणे च **राणायनीय, सात्यमुग्री, दुर्वासाः, भागुरिः, गौरुण्डी, गौल्गुलवी, भगवानौपमन्यवः, दारालः, गर्गसावर्णी, वर्षगण्य, कुथुमिः, शालिहोत्रः, जैमिनिश्च त्रयोदश इत्येते सामगाचार्याः स्वस्ति कुर्वन्तु तर्पिताः** (गृह्यपरिशिष्टे) इत्यनेन त्रयोदशसामगाचार्याणां नामनिर्देशनं कृतं लभ्यते । राणायनिः, कुथुमिः, जैमिनिः एते त्रयः इदानीमुपलभ्यमानशाखात्रयस्य आचार्याः, शाखाप्रवर्तकाः इति सिद्ध्यति । तद्वारा अवशिष्टाः दश अपि शाखाप्रवर्तकाः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

क–अमरकोशे द्वितीयकाण्डे भूमिवर्गे १५ तमः श्लोकः। का– छा.उ.८/४।

इत्येव निर्णेतुं शक्नुमः। वाचस्पत्यबृहदभिधाने असुरायणीय, वासुरायणीय, वार्तान्तवीय, प्राञ्जल, ऋग्वर्णभेदप्राचीनयोग्य, ज्ञानयोग्य, राणायनि इति अष्टसामगाचार्याणां नामान्युपलभ्यन्ते । तत्र **राणायनीयाः सप्तभेदाः भवन्ति राणायनीयाः, शाट्यमुग्राः, कालोपाः, महाकालोपाः, लाङ्गलायनाः, शार्दूलाः, कौथुमाश्चेति** इति चरणव्यूहवाक्यश्रवणेन एते सप्त अपि सामगाचार्याः (शाखाप्रवर्तकाः) आसन्निति वक्तुं शक्यते । तथा च आहत्य १.राणायनिः, २.सात्यमुग्राः, ३.दुर्वासाः, ४.भागुरिः, ५.गौर्गुण्डिः, ६.गौल्गुलवी, ७.औपमन्यवः, ८.दारालः, ९.गर्गसावर्णिः, १०.वर्षगण्यः, ११.कुथुमिः, १२.शालिहोत्रः, १३.जैमिनिः, १४.असुरायणीयः, १५.वासुरायणीयः, १६.वार्तान्तवीयः, १७.प्राञ्जलः, १८.ऋग्वर्णभेदप्राचीनयोग्यः, १९.ज्ञानयोग्यः, २०.शाट्यमुग्रः, २१.कालोपः, २२.महाकालोपः, २३.लाङ्गलायनः, २४.शार्दूल इति चतिर्विंशत्याचार्याणां नामतः परिज्ञानमभवत् इति निश्चिनुमः ।

शाखाविषये प्रतिहारसूत्रस्थ भूमिकायामेवमभिप्रैति **डा. बि. आर्. शर्मा महाभागः** – *The PS is commented on by Varadaraja who was believed to have belonged to the school of Ranayaniyas, a school which was once more popular in the south. But today this school has nearly disappeared leaving a very few followers in Andhra and north Karnataka and none in Tamil Nad and Kerala. The variations in the texts of Kauthuma and Ranayaniya recensions is vague. But some difference does exist in the way of recitation. But this mey soon become extinct since the traditional study of the Vedas is fast dwindling in the as it has already happened in the north long time ago. In Andhra, three or two versions of the Ranayaniya viz, Gurjara and Tamraparni, which are still prevalent and today the followers of the school of Ranayaniya keep the Kauthuma text before them and recite. The Gurjara version appeard to me older and more authentic yet it is difficult to pronounce any final opinion basing on this subtle difference perceived in the recitations of these two rare versions of Ranayaniya school. Today Kauthuma has replaced Ranayaniya in other parts of the country and it is likely that in no distant future this rare shakha might be known*

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

only by name.[कि] इति ।

सर्वासामेव संहितानां बहुप्राचीनत्वात् कालभेद–देशभेद–व्यक्तिभेदादिभिरध्ययनाध्यापनयोरुच्चारणादिभेदाः पाठभेदाश्च सम्पन्नाः, पाठन्यूनातिरिक्तता च किञ्चित् सञ्जाता, आचार्याणां प्रकृतिवैषम्यात् स्वदेशकालाद्यनुरोधाच्च अनुष्ठेयभेदाः तत्प्रयोगभेदाश्च प्राचीनभाषितं चरणषट्कं षड्गुरुशिष्येण एकविंशत्यध्वयुक्तमृग्वेदमृषयो विदुः। सहस्राध्वा सामवेदो यजुरेकशताध्वकम्। नवध्वाऽथर्वणोऽन्ये तु प्राहुः पञ्चदशाध्वकम् इत्यत्र अध्वाशब्देन देवता, गतिः, शाखा इति पर्यायवाचकाः इति च तत्रैवोक्तम् । इति वेदपरिचयात्मके त्रयीपरिचयः इत्यस्मिन् ग्रन्थे शाखाविषये विद्यते ।

एषु अनध्यायेष्वधीयानाः ते शतक्रतुवज्रेणाभिहताः[की] इति चरणव्यूह वचनात् सर्वे नष्टा वेति जिज्ञासायां नेति वक्तुं शक्यते यतोहि इदानीमपि सामश्रणात् । अधुना तु राणायनीय, कौथुम, जैमिनीयेति शाखात्रयमेवोपलभ्यते । सहस्रसंख्याकभेदाः अपि नष्टा एव । इदानीं तु द्रविड–वङ्ग–बिहारप्रदेशेषु कौथुमशाखा, द्राविडे केरले च जैमिनिशाखा, कर्नाटक–सिंहाचलप्रान्तेषु राणायनीयशाखा इति शाखात्रयमेवोपलभ्यते[कु] इति सामसारसर्वस्वे मायूरं. श्रीरामनाथदीक्षितवर्येणोक्तम् । इदानीं तु राणायनीयशाखा तु कर्नाटकराज्ये गोकर्णमण्डले, ताम्रपर्णीपाठ, गूर्जरपाठ इति भेदाभ्यां आन्ध्रपदेशस्य पूर्वगोदावर्यां, भद्राचलं, विजयवाडा, (आन्ध्रे), गोवर्धनीपाठ इत्यभिधानेन वाराणस्यां दृश्यते । कौथुमशाखा तु द्राविड–वङ्ग–बिहार–आन्ध्र–केरलेषु, क्वचित् केरले द्रविडदेशे च जैमिनिशाखा दृश्यते ।

एतेषां सर्वेषामध्ययनं किमिति चरणव्यूहेनावगम्यते । [कू]तेषामध्ययनमशीतिशतमाग्नेयं पवमानं चतुश्शतम् । ऐन्द्रं तु षड्विंशतिर्यानि गायन्ति सामगाः॥ तान्यधीत्य चण्डात्प्रचण्डतरो भवति शिष्टान्यधीत्य शिष्टाविंशतिको भवति । तत्र केचित् पुनः ऋक्तन्त्रं सामतन्त्रं संज्ञाधातुलक्षणमिति विधीयन्ते, अष्टौ सामसहस्राणि सामानि च चतुर्दश । अष्टौ शतानि नवतिर्विंशतिर्वालखिल्यकम् ॥ सरहस्यं ससुपर्णं प्रेक्ष्य तत्सामदर्पणम् ।

कि–प्रतिहारसूत्रं भूमिका पृष्ठ २८ । की–चरणव्यूहः । कु–सामसारसर्वस्व पृष्ठ ४ । कू–चरणव्यूहः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सारण्यकानि सौर्याणि ह्येतत्सामगणं स्मृतम् इति । अशीतिशतमाग्नेयं (१८०), पवमानं (१०४), ऐन्द्रं (२६), शिष्टाः (२८), गणानां पूरकाः।

परमधुना राणायनीयाः भारतस्य नवराज्येषु व्यापृताः सन्तः स्वशाखाध्ययनं कुर्वन्तः सन्ति । कर्नाटके गोकर्णमण्डले, आन्ध्रप्रदेशे- विजयनगरं, भद्राचलम्, अण्णावरम्, सिंहाचलम्, द्वारकातिरुमला, गजपतिनगरम्, हैदराबाद्, महानन्दी, गङ्गनपल्ली, तिरुपति, बोब्बिली, भीमावरम्, **विजयनगरे राणायनीय पाठशालापि वर्तते** । महाराष्ट्रे – अहमद्नगरम्, सावरगाँव, परभणी, टाकली, ढालेगाँव, बार्शी । राजस्थाने – वरुन्धनी । उत्तरप्रदेशे – वाराणसी, हरियाणा, केरल, तमिळुनाडु, इत्यादि राज्येष्वपि तत्र तत्र पाठ-प्रवचनं पारायणं वा कुर्वन्तः छात्रान् बोधयन्तश्च श्रोतॄन् सामध्वनिना तर्पयन्तः सन्ति श्रौत-स्मार्त-लक्षण-ब्राह्मणादि ग्रन्थाध्ययन-अध्यापनलोलुपाः सामगाः संहितां तथा ऊहोह्यगानादीन् राणायनीयपरम्परायामधीताः विद्वांसः। कर्नाटके होन्नावर होसाकुळि पञ्चग्रामस्थाः सामवेदिनः तथा तन्मूलीयाः जीवनार्थमन्यत्रगताश्च सर्वे राणायनीयपरम्परायामेवाध्ययनं, श्रौत-स्मार्त-काम्यकर्माणि शाखानुसारमेव कुर्वन्तः द्विशताधिकगृहस्थाः सन्ति । एतच्छाखीयाः बहवः समग्रे भारते श्रौतविद्यायां प्रावीण्यं प्रदर्शयन्तः सन्ति विद्वांसः । अनेन ज्ञायते यत् एतच्छाखावलम्बिनः न केवलं संहितादि रहस्यान्तमध्ययनपरम्परां रक्षितवन्तः तेन सह श्रौतस्मार्तकर्मस्वपि समग्रे देशे स्वशाखां सम्यगुपस्थापितवन्तः। तथा परम्परायामागतान् ग्रन्थादीन् स्वकृते एव संस्थाप्य तां परम्परामद्यावधि रक्षणं कुर्वन्तः सन्तीति शाखायाः अस्तित्वे च निदर्शनम् ॥

किञ्चित् स्वरविषये चिन्तनम्

"आर्चिकं गाथिकं चैव सामिकं च स्वरान्तरम् । कृतान्ते स्वरशास्त्राणां प्रयोक्तव्यं विशेषतः"[क]॥ आर्चिकं ऋक्स्वरं, गाथिकं ब्राह्मणादि पठनस्वरः, तथा सामिकं स्वरमिति सामवेदे स्वराणां त्रयो भेदाः भवन्ति । अत्र सामस्वराणां विषये किञ्चित् प्रस्तूयते ।

क-नारदीयाशिक्षा १.१.२

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सामवेदे क्रुष्ट-प्रथम-द्वितीय-तृतीय-चतुर्थ-मन्द्र-अतिस्वाराः इति सप्तस्वराः। षड्जश्च ऋषभश्चैव गान्धारो मध्यमस्तथा । पञ्चमो धैवतश्चैव निषादः सप्तमः स्वरः[कृ] ॥ एवं षड्ज-ऋषभ-गान्धार-मध्यम- धैवत-निषाद इति शास्त्रीय नामानि । "क्रुष्टः प्राजापत्यो ब्राह्मो वा वैश्वदेवो वा आदित्यानां प्रथमः, साध्यानां द्वितीयः, अग्नेस्तृतीयः, वायोश्चतुर्थः, सोमो मन्द्रः, मित्रावरुणयोरतिस्वार्यः" इति सप्तस्वराणामधिष्ठातृदेवताः निरूपिताः सामविधानब्राह्मणे[के]॥ "षड्जः प्रीणाति वै देवान् ऋषीन् प्रीणाति चर्षभः। पितॄन् प्रीणाति गान्धारो गन्धर्वान् मध्यमः स्वरः ॥ देवान् पितॄन् ऋषींश्चैव स्वरः प्रीणाति पञ्चमः। यक्षान् निषादः प्रीणाति भूतग्रामं च धैवतम्"[कै] ॥ इति षड्जादिस्वरैः तत्तद्देवताप्रीतिकरं भवतीत्युक्तं नारदीयशिक्षायाम् ॥ "पद्मपत्रप्रभः षड्जः ऋषभः शुकपिञ्जरः। कनकाभस्तु गान्धारो मध्यमः कुन्दसप्रभः ॥ पञ्चमस्तु भवेत्कृष्णः पीतकं धैवतं विदुः। निषादः सर्ववर्णश्च इत्येतत्स्वरवर्णता"[को] ॥ इत्येवं स्वराणां वर्णाः उक्ताः। "यः सामगानां प्रथमः स वेणोर्मध्यमः स्वरः। यो द्वितीयः स गान्धारस्तृतीयस्त्वृषभः स्मृतः ॥ चतुर्थः षड्ज इत्याहुः पञ्चमो धैवतो भवेत् । षष्ठो निषादो विज्ञेयः सप्तमः पञ्चमः स्मृतः"[कौ] ॥ इति साम्नि प्रथमादि स्वराणां वेणुस्वरसम्बन्धं सूचयति । "षड्जं वदति मायूरो गावो रम्भन्ति चर्षभम् । अजाविके तु गान्धारं क्रौञ्चो वदति मध्यमम् ॥ पुष्पसाधारणे काले कोकिलो वक्ति पञ्चमम् । अश्वस्तु धैवतं वक्ति निषादं वक्ति कुञ्जरः"[कं]॥ इति सप्तस्वराणामुदाहरणरूपेण पशुपक्षिणां ध्वनिसादृश्यं प्रदर्शितम् । "कण्ठादुत्तिष्ठते षड्जो शिरसस्त्वृषभः स्मृतः । गान्धारस्त्वानुनासिक्ये उरसो मध्यमः स्वरः ॥ उरसः शिरसः कण्ठादुच्छ्रितः पञ्चमः स्वरः। ललाटाद्धैवतं विद्यात् निषादं सर्वसन्धिजम्"[कः] ॥ इति सप्तस्वराणामुत्पत्तिस्थानं निरूपितम् । तथैव नाम्नि विशेषत्वं च सूचयति - नासाकण्ठमुरस्तालुजिह्वादन्तांश्च संश्रितः। षड्भिः सञ्जायते यस्मात् तस्मात् षड्ज इति स्मृतः॥ वायुः समुत्थितो नाभेः कण्ठशीर्षसमाहतः। नदत्यृषभवद्यस्मात् तस्मादृषभ उच्यते ॥ वायुः समुत्थितो नाभेः कण्ठशीर्ष-

---

कृ- ना.शि १.२.४ । के-१/५ । कै-ना.शि १/२/१५,१६ । को-ना.शि १/४/१,२ । कौ-१/५/१,२ । कं- ना.शि. १/५/४,५ । कः-ना.शि १/५/६,७ ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

समाहतः । नासागन्धवहः पुण्यो गान्धारस्तेन हेतुना ॥ वायुः समुत्थितो नाभेरुरो हृदि समाहतः । नाभिं प्राप्तो महानादो मध्यमत्वं समश्नुते ॥ वायुः समुत्थितो नाभेः उरोहृत्कण्ठशिरोहतः । पञ्चस्थानोत्थितस्यास्य पञ्चमत्वं विधीयते ॥ धैवतं च निषादं च वर्जयित्वा स्वरद्वयम् । शेषान् पञ्चस्वरांश्चान्यान् पञ्चस्थानोत्थितान् विदुः[ख]॥ अग्निगीतः स्वरः षड्जः ऋषभो ब्रह्मणोच्यते । सोमेन गीतो गान्धारो विष्णुना मध्यमः स्वरः। पञ्चमस्तु स्वरो गीतो नारदेन महात्मना । धैवतश्च निषादश्च गीतौ तुम्बुरुणा स्वरौ[खा]॥ इति देवैरपि गीतानां स्वराणां विशेषत्वं प्रतिपादितम् ॥

एवं सप्तस्वराणां स्वरूपमस्ति । सप्तस्वराणां नामान्तरं, स्वराणां देवताः, स्वराणां वर्णविशेषः, वेदलौकिकयोः स्वरनिर्देशनम्, प्राणिपक्षिषु स्वरविशेषः, स्वरोत्पत्तिस्थानम्, स्वराणां नाम्नि विशेषत्वम्, देवैः गीतमुदाहरण च दत्तमस्ति । समस्तजीवकोटिः एभिः सप्तस्वरैरेव उपजीवन्ति तृप्ताः भवन्तीति सामविधानब्राह्मणे स्पष्टीकृतम् – [खु]"स वा इदं विश्वं भूतमसृजत् । तस्य सामोपजीवनं प्रायच्छत् । उपजीवनीयो भवति य एवं वेद । तद्योऽसौ क्रुष्टतम इव साम्नः स्वरस्तं देवा उपजीवन्ति । योऽवरेषां प्रथमस्तं मनुष्या यो द्वितीयस्तं गन्धर्वाप्सरसो यस्तृतीयस्तं पशवो यश्चतुर्थस्तं पितरो ये चाण्डेषु शेरते यः पञ्चमस्तमसुररक्षांसि योऽत्यस्तमोषधयो वनस्पतयो यच्चान्यज्जगत्" इति । एवं विशिष्टैः सप्तस्वरैः देवतानां स्तुतिं कुर्वन्तो विद्वांसस्तन्निष्ठाः सामगाः धर्मार्थकाममोक्षाख्यां चतुरः पुरुषार्थान् प्राप्नुवन्ति । "तस्य गीतस्य माहात्म्यं के प्रशंसितुमीशते । धर्मार्थकाममोक्षाणामिदमेवैकसाधनम्"[खू] इति ॥ सामगानश्रवणमननिदिध्यासात् मोक्षं प्राप्नोति इति याज्ञवल्क्योऽपि स्पष्टयति – "यथा विधानेन पठन् सामगानमविच्युतम् । सावधानस्तध्यासात् परं ब्रह्माधिगच्छति"[खृ] इति ॥

एवं सप्तस्वरैः सामगाः सामगानं कुर्वन्तीति सर्वे जानन्ति । क्रुष्टस्वरेण आरम्भो वा समाप्तिर्वा न दृश्यते । अतिस्वार्यस्वरेण आरम्भो नास्ति समाप्तिरस्तीति भाति । एषां सप्तानां स्वराणां परस्परमिलितानां च उच्चावचं

ख–ना.शि.१/५/७–१२ । खा–ना.शि.१/५/१४,१५ । खु–सामविधानब्राह्मणम् १/२,३ । खू–सङ्गीतरत्नाकरे १/३० । खृ–याज्ञवल्क्यस्मृति पृ.३५०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्वरमुपलभ्यते। तत्र प्रथमस्वरेण आरब्धानि पर्वाणि १२, द्वितीयस्वरेण १२०, तृतीयस्वरेण ४६, चतुर्थस्वरेणा२३, पञ्चमस्वरेण २० आहत्य ३०१ रीत्या भवति। तथा प्रथमस्वरेण समाप्तिं प्राप्तानि पर्वाणि ३९, द्वितीयस्वरेण ५३, तृतीयस्वरेण ५६, चतुर्थस्वरेण ३९, पञ्चमस्वरेण १०४, अतिस्वार्येण १० सन्ति। आहत्य ३०१ भवन्ति॥

यत्र सामगाः विरम्य गायन्ति यत्र विरमते सामभागे च तत्र पर्वसञ्ज्ञा वर्तत इति परिभाषाकारस्य वचनम्। द्विविधं पर्व एकस्वरमनेकस्वरञ्चेति। यस्मिन् पर्वणि एक एव स्वरो वर्तते तदेकस्वरं पर्व भवति। तच्च षड्विधम्। यथा १) क्रुष्टस्वरः– क ऊ (४१२/४)। २) प्रथमस्वरः –क तद्विविढ्ढाइ (२५/३)। ३) द्वितीयःस्वरः– च इन्द्रँविश्वाः (५८४/१०)। ४) तृतीयस्वरः– ट इ (४७१/५)। ५) चतुर्थस्वरः– त हिताः (८५/३)। ६) पञ्चमस्वरः– प अग्निन्दू ताम् (५/१) इति। अनेकस्वरं पर्व त्रिविधम् अनुलोमगीतं प्रतिलोमगीत–मुभयविधगीतञ्चेति। उच्चादिनीचान्तमवरोहणक्रमेण गानमनुलोमगीतं भवति। तद्यथा – का आन्धाः। चा एऽ३। हिऽ४। ता जारा। इति स्वरद्वयस्य॥ कि अग्नायेऽ३। चि त्याऽ३४म्। टा प्रत्याग्ने। इति त्रयाणां स्वराणाम्॥ की ताऽ२३४म्। ची ऊतएकाम्। इति चतुर्णां स्वराणाम्॥ कु ओऽ२३४५इ। इति पञ्चस्वराणाम्। विपरीतगीतं प्रतिलोमगीतम्। आरोहणक्रमेण नीचाद्युच्चान्तं गानं भवति। तद्यथा – र नन्दाइ। य एहिया। ह हाऽ३। पि पुरु। इति स्वरद्वयस्य॥ या नुषेजाना इति त्रयाणां स्वराणाम्॥ पे सहोवानन्ता इति चतुर्णां स्वराणाम्॥ द्विविधमुभयविधगीतमुच्चाद्युच्चान्तं नीचादिनीचान्तं चेति। उच्चाद्युच्चान्तं यथा –कै वाइश्पाताइ। चे हऽसिया। ती प्रष्ठवाः। कं चाऽ२द्द क्षसाइ इति॥ नीचादि नीचान्तं यथा – चो ग्नेमहोभिः। टी प्रागोऽ३। पौ दू ताऽ३वोऽ३विश्ववेदसाम् इति। यदि एक एव स्वरः स्वरान्तरं प्राप्नोति तदा तस्य विस्वर इति सञ्ज्ञा भवति। तद्यथा – ओऽ२३४५इ। इति अत्र ओकारः प्रथमः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्वरः स मन्द्रान्तं गच्छति अत विस्वरः। विस्वरमक्षरं (ओ) स्वरे स्वरे त्रिमात्रं भवति[ख]। एवं विस्वरः स्वरः प्रत्युत्क्रमातिक्रमकर्षणस्वारेषु च स्वरे स्वरे त्रिमात्रं भवति[खे]। प्रत्युत्क्रमगीतं नवविधं भवति। १) अतिस्वारो मन्द्रं प्रत्युत्क्रामति परिस्वारे[खै] पा वाऽऽ५ऽ६५६ (७७२/१०)॥ कायाऽ३स्थाऽ५यिराद६५६न्[खो] (२२/७)। २) मन्द्रश्चतुर्थं प्रत्युत्क्रामति – तरोभिर्वोविदाऽ४द्वासूम् (२९२/१)। ३) चतुर्थस्तृतीयं प्रत्युत्क्रामति – दूताँऽ३वो (२१/१)। ४) तृतीयो द्वितीयं प्रत्युत्क्रामति – टू ही ऽ२३४षी (१/९)। ५) द्वितीयः प्रथमं प्रत्युत्क्रामति – र औहोऽ३इ (१०/६)। ६) मन्द्रश्चतुर्थमतिक्रम्य तृतीयं प्रत्युत्क्रामति – थ सुनोतसोमपा (४९४/१)। ७) मन्द्रश्चतुर्थतृतीयावतिक्रम्य द्वितीयं प्रत्युत्क्रामति – थै षिभाऽ२उ (१११०/१५)।

(अनुलोमगीतौ चतुर्विधोऽतिक्रमः प्रथमातिक्रमो द्वितीयातिक्रमश्चतुर्थातिक्रमस्तृतीयचतुर्थातिक्रमश्चेति मकारादि यथा सञ्ज्ञस्य ज्ञापकाः भवन्ति। मकारः प्रथमातिक्रमस्य, मा द्वितीयातिक्रमस्य, मिचतुर्थातिक्रमस्य, मी तृतीयचतुर्थातिक्रमस्य। प्रतिलोमगीतौ त्रिविधोऽतिक्रमः चतुर्थातिक्रमः, चतुर्थतृतीयातिक्रमो द्वितीयातिक्रमश्च मु चतुर्थातिक्रमस्य, मू चतुर्थतृतीयातिक्रमस्य, मे द्वितीयातिक्रमस्य इति[खौ])

अभिप्रियाऽ२। अत्र यानन्तरं मू इति वर्गपरिभाषापाठे लिख्यते (थै अभिप्रिया[मू] इति)। ८) तृतीयो द्वितीयमतिक्रम्य प्रथमं प्रत्युत्क्रामति– यि पुना[णमे]। पुनाऽ३१॥ ड़ति। पू षाँ[मु]हमो[ण]इ। षाहमोऽ३इ (२४३/८) अत्र मन्द्रः चतुर्थमतिक्रम्य तृतीयं गच्छति। अतः मु इत्यक्षरेण अतिक्रमं ज़ापयन्ति। ९) मन्द्रः चतुर्थतृतीयद्वितीयानतिक्रम्य प्रथमं प्रत्युत्क्रामति[खं]– गौ ई[प्रसं]हीहीहीहीहि। ईऽ२३४५हीहीहीहीहि (१८१/१८)। एवं प्रत्युत्क्रमाः साम्नि भवन्ति॥

अतिक्रमो नाम अनुलोम (अवरोहण) गीतौ स्वरः क्रमेणोपनतं स्वरान्तरं विहाय ततः पराचीनं स्वरं प्राप्नोतीत्यर्थः। यदा क्रमागतं स्वरमतिक्रम्य

ख्–मात्रालक्षणम् १/१६। खे–मा.ल १/१७। खै–मा.ल.१/१९। खो–अत्रस्थ उदाहरणानि मात्रालक्षणग्रन्थे दत्तानि। खौ–अस्मत् परम्परागतहस्तलिपि(वर्गपरिभाषापाठ)पुस्तके विद्यते। अतः तत्तत्स्वरातिक्रमे मकारादिभिः तत्र तत्र संसूच्यते। खं–मा.ल.१/३१।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्वरान्तरं प्राप्नोति तदा अतिक्रमः भवति स चतुर्विधो भवति । १) क्रुष्टः प्रथममतिक्रम्य द्वितीयं प्राप्नोति – का ऊ म । ऊ॒ऽ२ (४९२/७) । २) प्रथमो द्वितीयमतिक्रम्य तृतीयं प्राप्नोति – कौ नाकंसुपार्णमुपया मा त्पातन्ताम् । नाकं सुपार्णामुपयात्पातन्ताम् (५४२/६) । ब ज र्ही णमा षी प्रसं । बर्हीऽ३षीऽ२३४५ ।२/६) । खु आरो नमा हान् । आरोऽ३हान् (१४३/१) अत्र रोकारोपरि नमनस्वरः। नमनस्वरोच्चारणकाले तं स्वरं तर्जन्यधोभागमारभ्य अग्रं प्राप्याकाशं क्रमेण लब्ध्वा तृतीयस्वरे पतन्नङ्गुष्ठः प्रतिपादयति । ततश्च नमनं प्रथमादि तृतीयान्तं भवति । नमनस्वरे सर्वत्र द्वितीयातिक्रमः भवति । ३) तृतीयश्चतुर्थमतिक्रामति – क षि स्यनूँना ण म्पारीणा मि सी । कस्यनूनाऽ३म्पाऽ३रीणासी । ५५/३)। थे यज्ञा मि या । यज्ञाऽ५या (५९/१) । ४) प्रथमो द्वितीयतृतीयचतुर्थानतिक्रम्य मन्द्रं प्राप्नोति अश्विनोर्व्रते– ईऽ२३४५हीहीहीहीहि (१८१/१८) ।

कर्षणं पञ्चविधम् । प्रथमस्य आद्वितीयाकर्षणम्, आतृतीयाकर्षणम्, आचतुर्थाकर्षणम्, आमन्द्राकर्षणम्, मन्द्रस्य अतिस्वार्यात् कर्षणं चेति ॥ आद्वितीयाकर्षणं यथा – बोधाऽ२ (२५/२)। आतृतीयाकर्षणं यथा – आऽ२३इन्द्राः (४७७/७)। आचतुर्थकर्षणं यथा – न्माऽ२३४भाइ (१३७/१४)। आपञ्चमकर्षणं यथा – ओऽ२३४५इ (५/१०)। मन्द्रस्य अतिस्वार्यात् कर्षणं यथा – त्वन्त्वाऽ६मे (७२/१)॥ विन् कारो विनतस्य । प्रथमादि द्वितीयान्तं विनतम् – द्रविणस्युर्विप न्यायाऽ२ (६/४) ॥ णकारः प्रणतस्य । द्वितीयादिस्तृतीयान्तं प्रणतम् । छो आयाही ण । आयाहीऽ३ (१/२) । इति । [पातालकर्षणं यथा आयाहीऽ३ (१/२) । आकाशकर्षणं यथा – नाइहोतासाऽ२३ (१/७)][खः] ॥ उत्स्वरितम् चतुर्थादिः मन्द्रान्तम् – ता मनुष्येऽ५भिरग्निः (१२७/८)॥ अकारोऽभिगीतस्य । अभिगीतम् द्वितीयादिः प्रथमान्तम् । यथा त्वमग्ने पुष्करादधि साम्नि – त्रु आ अ मान्थाता ।

खः–प्रणतकर्षणे पातालकर्षणमाकाशकर्षं चेति द्विविधं कर्षणम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२अ ३ ५
आऽ२माऽ२न्थाऽ२३४ता (१८/४)। नकारो नमनस्य प्रथमादीस्तृतीयान्तम् यथा खु आरो^नमा^हान् । आरोऽ३हान् (१४३/२) ॥ प्रे प्रेङ्खस्य । प्रेङ्खं द्विविधम् । प्रथमादि द्वितीयान्तं द्वितीयादि द्वितीयान्तञ्चेति । प्रथमादि द्वितीयान्तं यथा– का तोया^प्रे^इ । तोयाऽ२इ (१/४)। द्वितीयादि?द्वितीयान्तं यथा ऍभा^प्रे^ इर्वर्धा । ऍभाऽ२र्वर्धा (१४/३)॥

स्वारस्त्रिविधः प्रथमादिर्द्वितीयादिस्तृतीयादिरिति । प्रथमादिर्नवमात्रः यथा ज हरी^ण^ श्रीः^प्रथम.सम्प्रसारणम्^ । हरीऽ३श्रीऽ२३४५ः (३३७/१०) ॥ द्वितीयादिः षण्मात्रः टू रया^द्वि.सम^यिम् ॥ रयाऽ३४५यिम् (७३/३) ॥ तृतीयादिरष्टमात्रः टू ई^तृ.सम्^ । ईऽ२३४५ (६७८/१४) ॥ एवं सप्तस्वराः तथा सप्तस्वराणां परस्परं सम्मिलितानां सङ्घातस्वराणां स्वरूपं भवति ॥

सामतन्त्रस्य अष्टमप्रपाठके प्रदर्शितानां भावानां विषये किञ्चित् प्रस्तूयते । ऋचि स्थितानामक्षराणां स्वराणां च विपरिणामः, ऋचि अश्रुतस्य नूतनाक्षरस्य साम्नि श्रवणमित्यादीनां स्वरूपं चतुस्त्रिंशद्भावैः निर्दिष्टमस्ति । तद्यथा –

०१.सन्ध्यागीतम् – प्रति+अस्मै इति ऋक्पदम् । साम्नि प्रत्यस्मै इति भवति । एवमेव प्रत्यग्ने इत्यादयः ।

०२.ह्रस्वभावः – देवी+एतु देव्येतु इति ऋक्पदस्य गीत्यां प्रादाइवियै इति भवति । अत्र विकर्षे वी शब्दस्य दीर्घस्य ह्रस्वभावः । एवं षिप्री–अन्धसः इत्यत्र प्री इतीकारस्य ह्रस्वभावः।

०३.विकर्षभावः – वि+अञ्जते । इत्येवमादौ अन्तस्थामित्यनेन सन्धौ ऋचि व्यञ्जते इति निष्पन्नस्य पदस्य गीत्यां वियञ्जते इति रूपसिद्धिः ।

०४.उद्घातः – ऋचि नीचस्वरस्य गीतावुच्चीभावः। सु अपत्यस्य इत्यत्र नीचानां सु अप शब्दान्तं स्वपत्य इति साम्नि उच्चस्वरभावः भवति ।

०५.स्वरितभावः – स्वरितस्य उच्चस्थत्वेऽपि नीचीभावः मनुष्येऽ५भिरग्निः (१२७/८) इति, उत्स्वरितम् इत्यस्य सञ्ज्ञा वर्तते ।

०६.आइभावः – योजान्विन्द्र इत्यत्र इकारस्य आइ भावः । योजानूऽ३वाऽ३इ

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

(७२६/९) इति, वाइ इत्याइभावः भवति ।

०७.ओभावः – शूरः+अग्रे = सन्धौ प्रकृतिभावे च शूरो अग्रे इति ऋचि स्थितः ओकारः साम्नि तथैव गीयते शूरोआऽ३ (१०३५/५) इति ।

०८.नुभावः – प्रत्युत्क्रम इत्यर्थः। देवोऽ३वोऽ३द्रविणोदाः (२४/१) अत्र चतुर्थस्तृतीयं प्रत्युत्क्रान्तः एवं तृतीयो द्वितीयम् । इदं च पर्व नीचादिनीचान्तमुभयविधगीतौ भवति । नु प्रत्युत्क्रम इत्येव तात्पर्यम् ।

०९.कर्षणभावः – द्वितीयस्तृतीयं प्राप्नोतीत्यर्थः प्रभूर्जयोयाऽ३थापाऽ१थाऽ२ (१४३/६) अत्र या द्वितीयस्वरः तृतीयं प्राप्नोति ।

१०.मिन् भावः – विनतमित्यर्थः। स्माइन्वाऽ२जीनीऽ२वशु (१०४५/२)। इत्यादि ।

११.वृद्धभावः – ह्रस्वाक्षराणां दीर्घाक्षराणां वृद्धभावः । दूरादीऽ२३हे वयत्सताः (३६२/१)। अत्र पर्वान्त्याक्षरस्य वृद्धभावः । मात्रात्रययुक्तमक्षरं वृद्धमित्युच्यते । त इति तस्य सञ्ज्ञा । तत्र अकारो वृद्धं प्राप्तः आकारो भवति । अतन्द्रः इति आदौ स्थितस्य अकारस्य तानैधनोक्[ग] इत्यनेन वृद्धे जाते आतन्द्रो इति सम्पद्यते । एवम् इकार, ईकार, एकार, ऐकाराणां वृद्धानामाइकारो भवति । त द्विविढ्ढाइ (२५/३) इत्यत्र सर्वोऽन्तः[गा] इति सूत्रेण अन्तिमस्य इकारस्य वृद्धत्वे तद्विविढ्ढाइ इति आइकारो भवति । उकार, ऊकार, ओकार,औकाराणां वृद्धानामाउकारो भवति । शतक्रतो इत्यत्र ओकारस्य वृद्धे प्राप्ते शतक्रताउ इति आउ कारो भवति । ऋकारो वृद्धे सति आर् भवति सुप्रकरस्नु इत्यस्य सकारोत्तरऋकारो वृद्धः भवति तदा साप्रा इति गीयते । यस्य दीर्घस्य वर्णस्योपरि र इति चिह्नं न भवति स वर्णो वृद्ध इति ज्ञातव्यः।

१२.अवृद्धभावः – जागन्नाऽ२३४पाः (१०/३) अत्र 'लघुयिनि'[गि] इति सूत्रेण वृद्धं प्राप्रस्य तदभावः गकारस्य । मइहाऽ२३४ना(५१२/२)। इत्यत्र इकारस्य 'तयोष्मि'[गी] इत्यनेन वृद्धे प्राप्ते निवृत्तप्रकरणापाठात् तदभावः ।

ग–सामतन्त्र १६६ । गा–सा.त.६६६ । गि–सा.त.४२६ । गी–सा.त.४४० ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१३.अभ्यासः – कथितस्य भागस्य पुनराम्नातः यत्सोमेऽ३सोमआ । यात्सोमेऽर सो (३२९/६)। इत्यादीनि ।

१४.दीर्घभावः – तक्षाद्यदी (१०४१/१) इत्यादीनि । दीर्घाक्षरस्य उपरिष्ठात् 'र' इति चिह्नं कृतम् ।

१५.रेफलोपः – सत्सिवर्हिषि इत्यत्र ऋचि श्रुतस्य रेफस्य त्साऽर३इबाऽ३ । हाऽर३४इषोऽ६हाइ (३/५,६) इति गीतौ लोपः ।

१६.रेफत्वम्– ऋचि श्रूयमाणरेफस्य गीतावपि श्रुतिः सुवार्दृशम्(३७७/८) इति ।

१७.नतिभावः – कर्षणमित्यर्थः । ष्टूतौ । वाऽ३२ (३२९/४,५) इति वा शब्दस्य नतिः कर्षणमित्यर्थः।

१८.स्तोभादेशः – स्वरपूरणार्थं स्तोभादेशः । प्रासोऽ३हाइ । आग्नेऽ३हाइ । तं वाऽ३१उवा२३ (१७१/१,२,३) इत्येवमादीनि ।

१९.विकर्षः – ऊनपादत्वाद्विकर्षः प्रकाव्यमित्यत्र त्रैष्टुभे छन्दसि प्रथमचतुथ–पादयोः दशदशाक्षराणि सन्ति । एकादशाक्षरसम्पत्यै काव्यमित्यस्य कावियमिति गीतौ विकर्षः ।

२०.निघातभावः – उदात्तस्य नीचीभावः क्रेयद्दूतैः(१११२/९) । अत्र तैरित्यस्य उदात्तस्य नीचीभावः।

२१.अनीचत्वम् – स्वरितस्य नीचस्य उच्चत्वम् । यस्सम्मिश्लोऽरहरियोर्यः (५०१/६) । इत्यत्र यो इत्यस्य ऋचि नीचत्वे सति साम्नि उच्चत्वम् ।

२२.उत्पत्तिः – ऋगुदात्तानुदात्तस्वरिताक्षराणां सङ्घात्स्वरोत्पत्तिः । ऊत्सोदेवाऽ२१ः (९४२/९) इति ।

२३.हीषीभावः – हीऽ२३४षी (१/९) एवं पर्वापत्तिः । षीऽ२३४बा इत्यादिषु स्वरिताक्षराणां सम्प्रसारणप्राप्तानामुदात्तानुदात्ताक्षराणां वृधेऽर (१९४/११) स्वरप्राप्तानां च हीषी स्वरभावः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२४.आजुहोतापत्तिः – आजुहोता (१०४/१) इति स्वरापत्तिः प्राणाशिशुः (११४४/१) इत्यत्र । एवमन्येषु पदेषु स्वरान्तरोत्पत्तिर्दृष्टव्या ।

२५.परिस्वारः – मन्द्रः यदा अतिस्वार्यमन्द्रातिस्वार्यान् प्राप्नोति तदा तेषां स्वरसमुदायानां परिस्वार इति सञ्ज्ञा । यथा ओऽ३२३४५वाऽ६५६ (६७३/२) । अत्र वकारो मन्द्रः परिस्वर्यते ।

२६.अतिहारभावः – अनुस्वारस्पर्शरिफाः स्तोभे प्रत्यये स्तोभमतीत्य ऋगक्षरेण सन्धीयन्ते । यथा तङ्गूर्धयास्वर्णरम् इत्यत्र मध्ये औहो इत्यस्मिन् स्तोभे आगते रेफाक्षरं परेण णकारेण सन्धीयते तङ्गूर्धयास्वौहोर्णाराम् (१७४/१) इति । तत्र स्तोभानन्तरं यदि पर्व समाप्तं भवेत्तदा तस्यातिहृतस्य वर्णस्य लोपः, अन्यथा न लोपः । यथा तङ्गूऽ३र्धाऽ३यासुवर्णरोवा (१७२/१) इति समाप्तपर्वणोऽतिहृतस्य म वर्णास्य लोपः।

२७.लोपभावः – ऋचि श्रूयमाणस्य व य लोपः। पूर्वत्र अतिहार एवोक्तः ।

२८.वन्तविधिः – हाकारः गाने उकारान्तो भवति । एवमकारादीन्यप्यक्षराणि । यथा हाउहोऽ५हाउ । एवमकारोऽपि आनीकयाऽ३१उवायेऽ३ (१४०/८) इति ।

२९.अम्भावः – ऋक्षु श्रूयमाणा आकार, इकार, ऋकार, उकाराः गीतौ अकारमापद्यन्ते । सहमैहैऽ३होऽ२ (२४५/६) इति । अत्र नृषाहम् इति षा गीतौ स भवति । सहाऽ३होयेऽ३४ (६१२/७) अत्र विश्वासाहं इति ऋचि, गाने सहा इति अकारो भवति[गु] । कृपापुवाहाउ (२३२/५) अत्र कृपा पावक इति ऋचि, पावक इत्यस्य पा अम्भावेन प भवति[गू] । ग । वाहाइ (२९२/७) गिर्वणः इति ऋचि, गाने अम्भावे ग इति भवति[गृ] । सखिदाऽ३दा (२६८/१३) सखाय इति ऋचि, गाने दकारे स्तोभे परे सखि इति भवति[गॄ] । धियाऽ२ । अर्णायाऽ२ः । नाऽ२ः । ईरासाऽ२३इ (७४९/९,१०,११,१२) । इत्यत्र ऋणया इति ऋचि, साम्नि

गु–सामतन्त्र ११०८ । गू–सा.त.१११० । गृ–सा.त.११११ । गॄ–सा.त.१११२ ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अर्णाया इति भवति[गो] । इन्द्रा३२होइ । हवे३२होइ (६५३/१,२) अत्र हुवे इति स्तोभगत हु शब्दो अभ्भावेन ह इति भवति[गै] ।

३०.ओभावः – सप्तमसङ्ख्यायां निर्दिष्टः एकः ओभावः, अयं ततोऽन्यः। तत्र सन्धौ ओकारः, अत्र अकारादीनामोभावः । अश्वाय इत्यत्र अकरः ओ भवति । अश्वोददा (२६८/९) इति । एवमकारादीनामपि ओत्वं विहितम् ।

३१.औभावः – अकारादयो वर्णाः औ भवन्ति वरुणस्य इत्यत्र रकारोत्तर उकारस्य औकारः वारौहो२ (३३४/४) इति ।

३२.ऐभावः – एकारादयो वर्णाः ऐकारमापद्यन्ते । यथा – एहीत्ययमैहीति ।

३३.एभावः – इकारादयो वर्णाः एकारमापद्यन्ते । दिवावसो इत्यत्र दे२३४वा (५९८/९) दकारोत्तर इकारः ए भावं प्राप्य दे इति भवति ।

३४.यभावः[गो] – ऋचि अश्रुतस्य यकारस्य साम्नि श्रवणम् । इनीमसि इत्यत्र मासी३या (३१४/४)। शुक्र आहुतः इत्यत्र सामत्रयेऽपि (६/६,७/९,८/६) यकारः श्रूयते ॥

सामवेदे एवं सप्तस्वराः, तेषां सम्मिलनेन प्रणत–विनत–नमन–कर्षण–उत्स्वरित–प्रेङ्ख–अभिगीतादि सङ्घातस्वराः तथा उपर्युक्तचतुस्त्रिंशत् भावाः अन्ये च शिक्षादिभिः निर्दिष्टधर्माः एतेषां ज्ञानेन अनुसरणेन च चत्वारोऽपि पुरुषार्थाः सिद्ध्यन्ति नास्त्यत्र विप्रतिपत्तिः।

अस्य ग्रन्थस्य विषये

कौथुमशाखाध्ययनाय संहितापुस्तकं मुद्रितं विद्यते तथैव जैमिनि शाखाध्ययनाय च । राणायनिकौथुमयोः केवलं मन्त्रविभाग (ग्रन्थविभागः)करणे भेदः तथा क्वचित् मन्त्रेषु पाठभेदः स्वरभेदश्च भवति । अध्ययनग्रन्थाः, ब्राह्मणग्रन्थाः,लक्षणग्रन्थाः, सूत्रग्रन्थाश्च सर्वे समाना एव । सर्वतन्त्र–स्वतन्त्र–

गो–सा.त.१११४ । गै–सा.त.१११५ । गो–एते चतुर्विंशतिभावाः समतन्त्रग्रन्थस्य (ए.एम्.ग॰॰नाथदीक्षितमहोदयेन कृत) भूमिकातः संगृहीतः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कवितार्किक–परमहंसपरिव्राजक–पण्डितराज स्वामी श्रीमद्भगवदाचार्य महाराजः स्वसामसंस्कारभाष्यपीठिकायां – इदानीमुपलभ्यमानासु जैमिनि कौथुमिराणायनीयसामसंहितासु राणायनीयानां संहितामियमनुधावति संहिता। कौथुमानामपि नास्त्यत्र विरोधः। केवलं मन्त्रगणनावर्त्मविभेदः। राणायनीयाः प्रपाठकार्धप्रपाठकदशतिभिर्ग्रन्थविभागं मन्त्रगणनां च साधयन्ति कौथुमाश्चाध्यायैः खण्डैश्चेति। अल्पीयानेवानयोः संहितयोः पाठभेदः। जैमिनीयानान्तु पाठभेदबाहुल्यं विद्यते[गौ]। इति राणायनीयकौथुमयोः व्यत्यासं निरूपितवन्तः। तस्मात्कारणात् प्रायः अद्यावधि राणायनीयसंहिताग्रन्थस्य स्थितिः तालपत्रेषु हस्तलिखितरूपेणैवास्ति। कर्नाटकस्य होन्नावरप्रान्तीयानां राणायनीय शाखानुसारिणां गृहस्थानां (विदुषां) गृहेषु ताडपत्रे लिखितं ग्रन्थं विद्यते। पुरा गृहे गृहे एव वेदपाठशाला आसीत्। अतः पठनार्थं ग्रन्थं सर्वं विलिख्य स्थापयन्ति स्म। कालक्रमेण तेऽपि लौकिकाध्ययने निरताः सन्तः उद्योगार्थमन्यत्र गमनकारणात् अत्र परम्परायाः ह्रासो जातः। केवलं कर्मसम्बन्धिमन्त्राणामध्ययनप्रवृत्तिः यद्यप्यस्मिन् प्रान्ते अन्यवेदिनामागता तथापि तस्याः प्रभावः सामशाखिनामुपरि तीव्रतया नाबाधत। कालस्य प्रभावेण (युगधर्मप्रभावेण वा) हस्तलिखितपुस्तकानि जीर्णप्रायाण्यासन्। अधुना तु नूतनतया पुनर्लेखनदिकं कार्यं सुतरां दुःशकमस्ति। १९७८ क्रिस्ताब्दपर्यन्तमपि दूरतोऽपि अत्रैवागत्य अध्ययनं कृत्वा स्वक्षेत्रं प्रति यान्ति स्म। तदा तु कालगतिः व्यवहारे तीव्रतरा नासीत्। अध्ययनकालोऽपि पर्याप्तरूपेणासीत्। इदानीमध्येतॄणां बाहुल्यात्, अध्ययनक्षेत्रस्य विस्ताराच्च सम्पूर्णस्य ग्रन्थस्यास्य लेखनापेक्षया मुद्रणमेव वरमिति भावयन्तः इदानीं प्रान्तीयलिप्यपेक्षया देवनागरलिपिकारणात् देशे सर्वत्रविद्यमानानामध्येतॄणां छात्राणां सुखबोधाय देवनागरलिप्यां मुद्रणार्थं कश्चन प्रयासोऽयं कृतो विद्यते।

तालपत्रेषु केवलं वर्गपरिभाषापाठक्रमःअस्ति। तदनन्तरकाले अध्येतॄणां

गौ–सामसंस्कारभाष्य पृष्ठ ५।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सुखाय (अद्यतनपरिस्थितिं पूर्वमेवालोच्य) संख्यास्वरेण सहितं तिकलरि लिप्यामेव लिखितमिति विदुषामभिप्रायः । द्वयोः वर्गपरिभाषापाठ एव राणायनीयशाखायाः पद्धतिः इति विदुषां मतमवलब्य वर्गपाठस्यैव संग्रहः कृतः । हस्तलिखितपुस्तके तालपत्रे वा ऋषि-छन्दो-देवतानां विवरणं किमपि नासीत् । **ऋषीणां नामधेयगोत्रोदाहरणं स्वर्ग्यं धन्यं पुण्यं पौत्रीयं पशव्यमायुष्यम् । यो ह वा अविदितार्षेयः च्छन्दोदैवतब्राह्मणोक्तेन मन्त्रेण याजयति वाध्यापयति वा स्थाणुं वार्च्छति गर्तं वा पद्यते प्र वा मीयते यातयामान्यस्य छन्दांसि भवन्ति । तस्मादेतानि मन्त्रे मन्त्रे विद्यात् । अयातयामान्यस्य छन्दांसि भवन्ति**[गं]। इति जैमिनीयार्षेयब्राह्मणवचनात् ऋषिच्छन्दोदेवतानां निर्देशनार्थं सामवेदार्षेयदीपः[गः] आश्रितः, साम्नां नामनिर्देशने सामवेदार्षेयब्राह्मणमाधाररूपेण स्वीकृतम् । मन्त्राणां संग्रहः प्रधानरूपेण ताडपत्रे तिकलरि लिप्यां स्थितहस्तलिखितपुस्तकं (क प्रतिः), सङ्ख्यास्वरेण तिकलरि लिप्यां लिखितं पुस्तकं (ख प्रतिः), देवनागरलिप्यां लिखितं हस्तलिखितपुस्तकं(ग प्रतिः), अध्ययनकाले स्थापितं कौथुमशाखायाः संहितापुस्तकं[घ], तथा च विदुषां सम्मतिं, पाठक्रमं, अध्ययनकाले गुरुमुखात् अधीतस्वर-पद्धति-पाठभेदान् च परिशील्य संग्रहः कृतो विद्यते । आवश्यकतायां सत्यां तत्र तत्र विवरणं च दत्तमस्ति ।

आदौ वर्गपरिभाषापाठक्रमोऽत्र दीयते[घा] ।

सप्तस्वरैः समस्तँ यो जगदेतच्चराचरम् ।
सञ्जीवयति विश्वात्मा स मे विष्णुः प्रसीदतु ॥

कवर्गशेषौ लकारवकारौ । कवर्गः क्वकारयुक्तः। चवर्गशेषाः शषसकाराः। चवर्गः श्वकारयुक्तः। पुनश्चवर्गे रेफशेषो ळकारः। शषसश्चरळ इति ।

गं-जैमिनीयार्षेयब्राह्मणम् प्रथमाध्याये प्रथमे खण्डे । गः-भट्ट भास्कराध्वरीन्द्र प्रणीतः, बि. आर्. शर्मणा संग्रहीतः, केन्द्रीय संस्कृत विद्यापीठ तिरुपति द्वारा सन् १९६७ तमे क्रिस्ताब्दे मुद्रापितः ग्रन्थः। घ-काञ्ची कामकोटिपीठद्वारा १९७६ तमे क्रिस्ताब्दे प्रकाशितः भागद्वयोपेतं संहितापुस्तकम् । घा-तिकलरि लिप्यां लिखितं अलैख शिवराम भट्टवर्यस्य तथा गोकर्णे हारूरि सुब्राय भट्टवर्यस्य च गृहे स्थितं प्राचीनं पुस्तकम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi.

टवर्गशेषो यकारः। तवर्गशेषो हकारः । साम्नां वक्तव्यं अन्ते छलाक्षरम् । (अत्र सर्वत्र पर्वसु द्वितीयोवर्णः स्वरबोधकः वर्गाक्षरः दत्तः यतोहि ताडपत्रे द्वितीयो वर्णः स्वरबोधकत्वेनैव निर्दिष्टमस्ति ।)

वर्गाक्षरपरिभाषापाठः

पर्वणि द्वितीयाक्षरः स्वरबोधकः । ततः पर्व अनन्तरं सामसङ्ख्या, पर्वसङ्ख्या, स्वरसञ्चारः, पर्वणिस्थितदीर्घाणां सङ्ख्या दत्ता विद्यते । प्रणतं ण कारेण, नमनं न कारेण, विनतं विकारेण, अभिगीतम् अ कारेण, अतिस्वार्यं ङ कारेण, दीर्घं ॅ अनेन चिह्नेन, प्रथमद्वितीयाद्यतिक्रमं म मा इत्यादिभिरक्षरैः, सन्धिनिषेधस्थलं स्थि कारेण, (वृ, तृ र्थ इत्यादीनि अक्षराणि पर्वणि मध्ये सन्ति तेषां मूलं गवेषणीयम्)

तत्र कवर्गः लकारवकारक्वकाराश्च प्रथमादिस्वराणां तदादीनां च पर्वणां ज्ञापकः । तत्र क इति प्रथस्वरस्य पर्वणो यथा - द्वितीयसाम्नि

तकयाइ । तयाइ (सामसङ्ख्या२/पर्वसङ्ख्या२, स्वरसञ्चारः१/दीर्घः०) ॥ गृकाणॅानॅोहा । का गृणानोहा(१/४, १२/२) ॥ सकिमायेण । कि समायेऽ३ (७/७, १२३/०) ॥ ताकीम् । की ताऽ२३४म् (३८८/१, १२३४/०)॥ ओकुइ । कु ओऽ२३४ई (५/१०, १२३४५/०) ॥ हाकूइषो ऽहाइ । कू हाऽ२३४इषाॅऽ६हाइ (३/६, १२३४५६५/०) ॥ आकेताइष्ठा ऽज्ञत् । के आताऽ२३४इष्ठाॅऽ६५६त् (५४९/४, १२३४५६५६/०) ॥*॥ सकैमीद्धरशुक्रया । कै समीद्धरशुक्रया (८/६, १२१/०)॥ ऊकोपाण होइ । को ऊपाऽ३होइ (१६९/७, १२३१/०) ॥ नाॅकौकॅेसुपार्णमुपयामा त्पातन्ताम् । कौ नाकेसुपार्णमुपयात्पातन्ताम् (५४२/६, १३२१/२) ॥ चाकंदक्षासाइ । कं चाऽरदक्षासाइ (५७/६, १२३२१/०) ॥ गृकःणॅा नॅोहव्यदॅाताणयाइ । कः गृणानोहव्यदाताऽ३याइ (२/३, १२३२/३) ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

क का कि की कु कू के कै को कौ कं कः इति द्वादशस्वरभेदान् ज्ञापयति । अत्र प्रथमस्वरे क कै को कौ कं, द्वितीयस्वरे का कः, तृतीयस्वरे कि, चतुर्थस्वरे की, मन्द्रे कु कू, अतिस्वारे च के पर्व समाप्यते ।

ना खन वे । ख ना२ऽ३वे३ऽ३४३ (१०/८, १३२३४३/०) ॥ कू खा व स्यवावृषभोयुवा । खा कू२ऽ२३४वस्यवावृषभोयुवा (२३७/१, १२३४ ५४/१) ॥ वा खि तों मि हाइ । खि वा२ऽ२र्तो३ऽ५हाइ (३०६/१०, १२३५२/०) ॥*॥ ष्ण खी वा न इ । खी ष्णवा१ऽ३इ (६७९/१५, १३/०) ॥ दा खु इवँ मा ययाउ । खु दा१इवँ३य२याउ (५९८/७, १३२/०) ॥ दा खू इमा न उवा ण । खू दा१इमा२ऽ३उवा२ऽ३ (१८५/४, १३२३/०) ॥ औ खेन हो ण वा । खे औ२ऽ३हो२ऽ३वा (४५७/५, १३२३२/०) ॥ औ खैन हो ण वा ण । खै औ२ऽ३हो२ऽ३वा२ऽ३ (९२३/४, १३२३२३/०) ॥ औ खोन होइ । खो औ२ऽ३हो३ऽ४इ (३१५/६, १३२३४/०) ॥ मा खौ हा न उवा । खौ मा१हा२ऽ३उवा२ऽ३४३ (८१७/५, १३२३४३/०) ॥ ओ खंन हाए । खं ओ२ऽ३हाए२ऽ३४ (७६/४, १३२३२ ३४/०) ॥ स्वा खःन आओवा । खः स्वा२ऽ३आओ२ऽ३४५वा (८४५/७, १३२३२३४५/०)॥

ख खा खि खी खु खू खे खै खो खौ खं खः इति द्वादशभेदाः। एषु प्रथमस्वरे०, द्वितीयस्वरे खि खु खे, तृतीयस्वरे ख खी खू खै खौ, चतुर्थस्वरे खा खो खं, मन्द्रस्वरे खः सपाप्यते ।

द्र ग वी मा णास्यूः। ग द्र१वी३णा२ऽ३४५स्यूः (७/५, १३२३४५/०) ॥ ई गामा हा तृसं। गा ई१हा३ऽ१२३४५ (२६२/११, १३२३४५/०) ॥ औ गिन हो वाङ । गि औ२ऽ३हो२ऽ३४वा५ऽ६५६ (२८९/१२, १३२३४५६५६/०) ॥*॥ हौ गीन हो ण इ । गी हौ२ऽ३हो२ऽ३१इ (९१/७, १३२३१/०) ॥ औ गुन हो ण । गु

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

औऽ३होऽ३१२ (९१/ २३, १३२३१२/०) ॥ औ^गून^ हो^ण^ ये^ण^। गू औऽ३हो ऽ३१येऽ३ (३३६/९, १३२३१२३/०) ॥ हौ^गेन^ हो^ण^ इ । गेहौऽ३होऽ३१२३४ इ (३३५/१२, १३२३१२३४५/०)॥*॥ ई^गैप्रसं^ हीहीहीहीहि । गै ईऽ२ ३४५हीहीहीहीहि (१८१/१८, १२३४५१२३२/२) ॥ स्तो^५गो^ म७रुद्रायद्‌शीकाम् । गो स्तोम७रुद्रायद्‌शीकाम् (२५/७, १२१२१/३) ॥ ण्वा^गौ^ ऋ^अ^ ताजा^ण^। गौ ण्वाऋ१ताजाऽ३१ (९३/६, १२१२३१/०) ॥ यो^गं^ वृत्र होवा^ण^ ओवा । गं योवृत्रहोवाऽ३ओऽ२३४वा (४७४/६, १२१२३१२ ३४५/०) ॥*॥ औ^५ग:^ होवाहा^ण^ होइ । गः औहोवाहाऽ३होइ (१०२४/१, १२३२३१/३) ॥

ग गा गि गी गु गू गे गै गो गौ गं गः इति द्वादशभेदः॥ एषु प्रथमे गी गो गौ गः, द्वितीये गु गै, तृतीये गू, चतुर्थे०, मन्द्रे गा गे गं, अतिस्वारे गि समाप्यते।

ना^५घ^ मत्वष्टुरपीच्यामियाउवा^ण^ होवा^ण^ हा^प्रें५^ ईया । घ नामत्वष्टुरपी च्यामियाउवाऽ३होवाऽ३हाऽ२ईया (२५०/५, १२३१२३१२१/३) ॥ म^घा५^ धो अर्षन्तिधारयाउवा^ण^ होवा^ण^ हा^प्रें^ ईया । घा मधोअर्षन्तिधारयाउवाऽ२३हो वाऽ२३हाऽ२ईयाऽ२ (८९९/४, १२३१२३१२१२/२) ॥ क^घि^ स्यानूनाम् । घि कस्यानूऽ२नाऽ२म् (५४/१, १२१२/०) ॥ ना^घी^ इहोतासा^ण^। घी नाइ होतासाऽ२३ (१/७, १२१२३/१) ॥ इ^घु^ न्द्रमर्चयाथाविदाइ । घु इन्द्र मर्चयाथाऽ१विदाऽ२३४इ (३८१/३, १२१२३४/०) ॥ गा^घू^ इर्भिर्नावोवा । घू गाइर्भिर्नावोऽ२३४वा (३८८/१२, १२१२३४५/०) ॥ यः^घे^ सुक्षिताइ नोऽहाइ । घे यस्सुक्षिताऽ२३४इनोऽ६हाइ (११८४/६, १२१२३४५६५

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

/०) ॥*॥ गृ घै णानोहव्यादाता ण ये । घै गृणानोहव्यादाऽ१ताऽ३यें (३/३, १२१२३२/२) ॥ वा घो इश्वेभिस्सो ण हा ण । घो वाइश्वेभिस्सोऽ३हाऽ३ (३१९/३, १२३२३/१) ॥ उ घौ पमान्देवाताता ण याइ । घौ उपमान्देवाता ताऽ२३याऽ३इ (६८१/४, १२१२३२३४/३) ॥ ओ घं ना अ री । घं ओ नाऽ१रीऽ३४३ (५१६/२८, १२१२३४३/०) ॥ हो घः वा ण हो । घः होवाऽ३ होऽ२ (२९९/७, १२३१२/०) ॥

घ घा घि घी घु घू घे घै घो घौ घं घः इति द्वादशभेदः॥ एषु प्रथमे घ, द्वितीये घा घि घै घः, तृतीये घी घो घं, चतुर्थे घु घौ, मन्द्रे घू घे समाप्यते ।

सू ङ नु ऽसात्या ण१ण । ङ सूनुऽसात्याऽ३१२३ (३०३/५, १२३१२३ /०) ॥ आ ङा भिवात्सा ण म् । ङा आभिवात्साऽ३१२३४म् (३८५/४, १२३१२३४/०)॥ धि ङि याऋणयानओवा ण ओवा । ङि धियाऋणयानओ वाऽ३ओऽ२३४वा (७५१/५, १२३१२३४५/२) ॥*॥ आ ङी ऽशूमातीमाति ष्ठा ण त् । ङी आऽशूमातीमातिष्ठाऽ२३त् (५४७/२, १२३२१२३/१) ॥ षू ङु दाधिषोइ । ङु षूऽ२दाधिषोऽ२३४इ (९७१/६, १२३२१२३४५) ॥ अ ङू भ्राजीज्ज्योतिरभ्राजी तृसं त् । ङू अभ्राजीज्ज्योतिरभ्राजीऽ२३४५त् (२६५/३०, १२१२३२३४५/४) ॥*॥ इ ङे न्द्रा विन् ऽसबाधाऊताय विन् । ङे इन्द्राऽ२ऽसबाधाऊतायेऽ२ (३९०/४, १२१२१२/४) ॥ सा ङै दा विन् याच न्नाहञ्जिया ण । ङै सादाऽ२याचन्नाहञ्जियाऽ३(५२०/४, १२१२१२३/२) ॥ इ ङो न्दुःसमुद्रमूर्वीयाविभाती तृसं । ङो इन्दुस्समुद्रमूर्वीयाविभातीऽ२ ३४५ (६४८/१४, १२१२१२३२३४५/२) ॥ से ङौ तूऽस्तीर्त्वोचातुरा प्रसं :।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

डौ सेतूऽस्तीर्त्वाचातुराऽ२३४५: (८९/७४, १२१२१२३४५/४) ॥*॥ इ डं न्द्र विन सामा विन स्साहाइ । डं इन्द्रेऽ२सोमाऽ२स्साहाइ (१०४७/५, १२१२१२१/३) ॥ त्वँ डः वृत्राँणिर्हऽस्यप्रातीन्न्येकाइत्पूरू । डः त्वँवृत्रा णिहऽस्यप्रातीन्न्येकाइत्पूरू (४२३/८, १२१२१२१/३) ॥

ड डा डि डी डु डू डे डै डो डौ डं डः इति द्वादशभेदाः ॥ एषु प्रथमे डं डः, द्वितीये डे, तृतीये ड डी डै, चतुर्थे डा, मन्द्रे डि डु डू डो डौ समाप्यते ।

या ल जारितृभ्योमाघावा विन पुरूवासुः। ल योजारितृभ्योमाघावा ऽ२पुरूवासुः(३८२/६, १२१२१२१२/४) ॥ या ला रा विन यामा विन नेतायाइ डा विन ना ण म् । ला योराऽ२यामाऽ२नेतायाइडाऽ२नाऽ३म् (११८६/५, १२१२१२१२३ /७) ॥ य लि केचोदरासर्पिणस्तेभ्योनमा प्रसं: । लि येके चोदरासर्पिणस्तेभ्योनमाऽ२३४५: (८८/२३, १२१२१२१२३४५/५) ॥*॥ य ली स्मादापओषधयोभुवनानिचक्रादूः। ली यस्मादापओषधयोभुवना निचक्रादूः (१६४/१३, १२१२१२१२१/५) ॥ ज लु नदिवामन्तरीक्षम्पृथि वींविश्वाभोजसम्पुरुरूपाअजीजनः। लु जनदिवामन्तरीक्षम्पृथिवींवि श्वाभोजसम्पुरुरूपाअजीजनः (१७६/४०, १२१२१२१२१२/५) ॥ अ लू रूरुचद्धमोअरूरुचदुषसान्दिविसूर्योविभाती तृसं । लू अरूरुचद्धमोअ रूरुचदुषसान्दिविसूर्योविभातीऽ२३४५ (१११/१५, १२१२१२१२१२३२३ ४५/७)॥*॥ न ले मोन्नायनमोन्नपतयएकाक्षायचावपन्नादायाचनमोनमः॥ ले नमोन्नायनमोन्नपतयएकाक्षायचावपन्नादायाचनमोनमः (२१४/१०, १२१२१२१२१२१/१०) ॥ ते लै जोधर्मस्सङ्क्रीडन्तेवायुगोपास्तेजस्व

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तीर्मारुद्भिर्भुवनानिचक्रादुः उच्चैः । लै तेजोधर्मस्सङ्क्रीडन्तेवायुगोपा
स्तेजस्वतीर्मारुद्भिर्भुवनानिचक्रादुः(१६२/३८,१२१२१२१२१२१२१/१०)॥
